लोकव्यवहारः क्वचिदेव जुगुप्सितस्पर्शोपहतएव द्रव्ये, न सर्व्वत्र । तत्रापि सामान्यतश्चासौ व्यवहारो न द्रव्यदेशकालावस्थादिभेदकृतो, नवा शुद्ध्यशुद्धितारतम्यविशेषकृतः । अतः सर्व्वत्र विशेषतश्च शुद्ध्यशुद्ध्योः शास्त्रादेव निश्चयः । यस्तु चण्डालादिस्पर्शादावपि विशेषतश्च लोकव्यवहारः स तु शास्त्रमूलप्रसिद्धिमाश्रित्यैव यागदानहोमादिषु श्रेयःसाधनत्ववत् । कथं पुनः कार्य्यार्थपरेण धर्म्मशास्त्रेण शुद्ध्यशुद्धिरूपस्य सिद्धार्थस्यावगतिः ? श्रुतार्थापत्त्येति ब्रूमः । तथाहि यथा दर्शपौर्णमासाभ्यां स्वर्गकामोयजेतेत्यादौ क्षणिकानां यागानां श्रूयमाणकालान्तरभाविस्वर्गसाधनत्वान्यथानुपपत्त्या पुरुषे शुभापूर्व्वसिद्धिः, यथा च क्षणिकस्यावगोरणस्य श्रुतकालान्तरभाविशततयातनासाधनत्वान्यथानुपपत्त्या दुरितापूर्व्वसिद्धिः । तथा मूत्रपुरीषादिसंस्पृष्टेन न व्यवहर्त्तव्यम् प्रक्षालनप्रोक्षणादिसंस्कारवता तु व्यवहर्त्तव्यमिति श्रुतव्यवहारनिषेधतदभ्यनुज्ञानान्यथानुपपत्त्या द्रव्यादिगतशुद्ध्यशुद्धिरूपसिद्धार्थकल्पना न विरुध्यते । अथ वा शुद्ध्यशुद्धिस्मृतीनां सिद्धार्थवादपरत्वमेवास्तु तासां च तादृशमेव वेदवाक्यं मूलं कल्प्यते स्वार्थमात्रार्थानुसारिणी हि वेदकल्पना । नास्ति नियमः कार्य्यार्थपरेणैव वेदेन भाव्यमिति “तद्भूतानां क्रियार्थेन समाम्नायः” इति न्यायेन सिद्धार्थानामपि विध्येकवाक्यतया प्रामाण्यव्यवस्थापनात् । प्रकृते च कर्म्मविधायके प्रागुक्तब्रह्माण्डवाक्ये अधिकारिविशेषणतया साधनविशेषणतया च शुद्धेः, अशुद्धेश्च पर्य्युदस्ततया सिद्धाया अपि विधिनैकवाक्यतया प्रामाण्यसम्भवः । किञ्च प्रक्षालितेनैव व्यवहर्त्तव्यमिति नियमविधिर्दृश्यते अतो वेदमूलत्वकल्पना । अतः शुद्ध्यशुद्धी उभे अपि शास्त्रादेवावगम्ये । तदुक्तं “शुद्ध्यशुद्धी ह्यदृष्टत्वाद्विज्ञायेते यथाश्रुति” तदेवं वसा शुक्रमित्यादिभिरशुद्धिवचनैरशुद्धिर्गम्यते जलेनैव विशुध्यतीत्यादिभिश्च शुद्धिर्विधीयते । अतोऽष्टकादिस्मृतिवत् वेदमूले एव शुद्ध्यशुद्धिस्मृती । शुद्धिवचनैश्चाशुद्धिराक्षिप्यते शुद्धिर्हि मूत्राद्युपघातेनाशुद्धानां द्रव्याणां संस्काररूपा कर्त्तव्यतया विधीयते न पुनः शुद्धानाम्, न हि सुवर्णादयः भावा स्वभावेनाशुद्धाः येन प्रयोगकाले शुद्धिमपेक्षेरन् । अथादृष्टार्थं व्रीहिप्रोक्षणवत् प्रयोगकाले संस्कारोविधीयते इति चेत् न तथात्वे अशुद्धिज्ञापकं वचनं विरुध्येत अतः सिद्धं शुद्ध्यशुद्ध्योः शास्त्रगम्यत्वम् । तत्र शुद्धिर्नानाविधाऽपि संक्षेपात् द्विविधा बाह्या आभ्यन्तरा च । यथा “अथातः शौचाध्यायं व्याख्यास्यामस्तद्द्विविधम् बाह्यमाभ्यन्तरञ्च आन्तरं शौचं नाम यद्यदहङ्कारनिन्दितेभ्यो मनो निवर्त्तते, बाह्यमपि गन्धलेपस्नेहोपघातेऽद्भिरनिष्टपुरुषस्पर्शने प्रोक्षणाच्छुचिरित्यशुचिप्रतिषेधः, हृदयशौचमनुलम्रता साधुता, कर्म्मशौचमगर्हितकर्म्मण्यता, शरीरशौचं मृद्भिरद्भिश्च, वाचाम् अप्रियानृतनिष्ठुर्य्यवर्जनम्, मनसो मिथ्यासंकल्पप्रतिषेधः, बुद्धेर्ज्ञानम् । श्रूयते द्विविधं शौचं यच्छिष्टैः पर्य्युपासितम्” । “बाह्यं निर्लेपनिर्गन्धमन्तःशौचमहिंसनम्” इति च उश० । “अद्भिः शुध्यन्ति गात्राणि बुद्धिर्ज्ञानेन शुध्यति । अहिंसया च भूतात्मा मनः सत्येन शुध्यति” इति “कालोऽग्निर्मनसः शुद्धिरुदकाद्यनुलेपनम् अविज्ञानञ्च भूतानां षड्विधं शौचमुच्यते । देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनम् । उपपत्तिमवस्थां च परिज्ञाय यथाविधि । शौचज्ञः कुशलो धर्म्मे धर्म्मेप्सुः शौचमाचरेत्” इति च बौधा० “अनिलानलसोमसूर्य्यकाञ्चनरजतभस्मतोयताम्रैः, अजमुखवालधिगोमयरजआद्यैः स्पर्शगुणैरिह मेध्यतां नयन्ति” हारी० “आत्मयाजिनां शरीरस्याद्भिर्मृद्भिश्च, ज्ञानेन बुद्धेः, तपसा पापानां, सन्तानजानां मातृपैतृकाणां दोषाणां यमनियममन्त्रव्रतोपवासादिभिः” शङ्खलि० “ज्ञानं तपोऽग्निराहारो मृण्मयो वार्य्युपाञ्जनम् वायुः कर्म्मार्ककालौ च शुद्धिकर्त्तॄणि देहिनाम्” सर्वेषामेव शौचानामन्नशौचं परं स्मृतम् । योऽन्ने शुचिर्हि स शुचिर्न मृद्वारि-शुचिः शुचिः । क्षान्त्या शुध्यन्ति विद्वांसोदानेनाकार्य्यकारिणः । प्रच्छन्नपापाजप्येन तपसा वेदवित्तमाः । शोध्यं शुध्यति मृत्तोयैर्नदी वेगेन शुध्यति रजसा स्त्री मनोदुष्टा संन्यासेन द्विजोत्तमाः । अद्भिर्गात्राणि शुध्यन्ति मनः सत्येन शुध्यति । मनुः “कालोऽग्निः कर्म्म मृद्वारि मनोज्ञानं तपो जलम् । पश्चात्तापो निराहारः सर्वेषां शुद्धिहेतवः । अकार्य्यकारिणां दानम्” क्षेत्रज्ञस्येश्वरज्ञानात् विशुद्धिः परमा मता” या० स्मृ० “सत्यं शौचं तपःशौचं शौचमिन्द्रियसंयमः । सर्व्वभूतदया शौचमद्भिस्तु पञ्चमं मतम्” यमः “गात्रं मृदम्भसा शुध्येच्चित्तं भूतान्वशंसनात् । विद्यया तपसा देही मतिर्ज्ञानेन शुध्यति । स्वाध्यायेनानुतापेन होमेन तपसैव च । ध्यानेन क्षेत्रवासेन दानेनेह परिक्षयः । परापवादाश्रवणं परस्त्रीणामदर्शनम् । एतच्छौचं श्रोत्रदृशो जिह्वाशुद्धिरपैशुनम् । अप्राणिवधमस्तेयं